International Journal of Applied Research 2021; 7(8): 447-448




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2021; 7(8): 447-448
www.allresearchjournal.com
Received: 09-07-2021
Accepted: 12-08-2021

**डॉ0 इन्द्रेश कुमार झा**
अफजला बलिया, बिरौल, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ0 इन्द्रेश कुमार झा**
अफजला बलिया, बिरौल, दरभंगा, बिहार, भारत

# सनातनधर्मे नीलकण्ठस्यकृते अवदानञ्च

## डॉ0 इन्द्रेश कुमार झा

**प्रस्तावनाः**

नीलकण्ठभट्टेन भगवन्तभास्कर–संज्ञके महानिबन्धे विविध–धर्म शास्त्रीयविषयानाधृत्य 'मयूखाभिधाः द्वादश ग्रन्थाः उपनिबद्धाः। तेषु व्यवहार–प्रतिपादकः 'व्यवहारमयूखः' धर्मशास्त्रीयनिबन्धसाहित्ये शीर्षस्थानं भजते। ग्रन्थेऽस्मिन् विविधमतोल्लेखपुरस्सरं नीलकण्ठेन ग्रन्थादौ व्यवहारलक्षणं तत्स्वरूपञ्च विशदतया विमृष्टम्।

याज्ञवल्क्यस्मृतिशुक्रनीतिकामन्दकीयनीतिसारनीतिवाक्यामृतादि– ग्रन्थेषु व्यवहारशब्दो विध्यर्थे रूढः। अतएव 'व्यवहारन्यायालयादीनां समुल्लेखः। अनुसन्धेयग्रन्थे व्यवहारलक्षणं यथा–

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्[1]।।

अस्यायं भावः– स्मृतिप्रतिपादित– आचाररहितेन मार्गेण कार्येण उपायेन वा परैः अन्यैः आधर्षितः तिरस्कृतः प्रताडितो वा जनो यद् राज्ञे न्यायाधीशाय (न्यायप्रात्यर्थं) आवेदयति याचते तद् व्यवहारपदम् व्यवहारवाच्यम्।

अमरकोशो विवादः व्यवहारः स्यात्[2] विरुद्धो वादः विवादः। 'विनानार्थेऽवसंदेहे हरणं हार उच्यते। नाना–संदेहहरणाद् व्यवहार इति स्मृतः[3]। इति कात्यायनः। 'व्यवहारः स्थितौ पो' इति हैमः[4]। एवं हि 'व्यवहार' शब्दस्य 'विधि'– प्रक्रियायां व्यवस्थायां वा रूढत्वं सिध्यति। लोके ह्यधुना व्यवहारशब्दः सामान्याचरणस्य कृते प्रयुज्यते। न्यायापरपर्यायो धर्मः, व्यवहारस्तु न्यायसंबन्धी, तस्य शास्त्रम् धर्मशास्त्रम्। व्यवहारमयूखेऽस्मिन् ग्रन्थे स एव व्यवहारः प्रतिपाद्यः। उच्यते व्यवहारमयूखे एव[5]–
विप्रतिपद्यमाननरान्तरगताज्ञाताधर्मज्ञापनानुकूलो व्यापारो व्यवहारः। वादिप्रतिवादिकर्तृकः संभवद्भोगसाक्षिप्रमाणको विरोधिकोटि व्यवस्थापनानुकूलो वा व्यापारः सः। संप्रतिपत्युत्तरे तु व्यवहारपदप्रयोगो भवति इति मदनरत्ने। वादवितण्डादिव्यावृत्यर्थमुत्तरदलम्।

स्वग्रन्थविषये ग्रन्थकारस्योक्तिः (प्रमाणसम्मतोऽयं ग्रन्थः)

नीलकण्ठभट्टेन व्यवहारमयूखस्यादौ चतुर्षु मत्रलश्लोकेषु मात्रलिकशिष्टाचारेण सह स्वग्रन्थस्य वैशिष्ट्यस्यापि संकेतः कृतः–

उक्त्वा नृपनयरीतिं नत्वा भास्वत्पदाम्बुजं सम्यक्।
विरचयति नीलकण्ठो व्यवहारविनिर्णये किंचित्[6]।।

ग्रन्थोऽयं नीलकण्ठस्य न प्रथमः, ग्रन्थस्यास्य प्रणयनात्पूर्वं नृपनयरीतिसक्तेन तेन अर्थात् नीतिमयूखस्य रचनानन्तरं व्यवहारमयूखस्य प्रणयनं कृतम्। नीतिमयूखे ग्रन्थान्ते तेन लिखितम् 'व्यवहारमयूखे दर्शयिष्यामः'। नीतिमयूखे[7] व्यवहारमयूखप्रतिपाद्यविषया नोक्ताः। यतो हि नीति मयूखे मुख्यत नीतिविषयिणी चर्चा विहिता, तत्र राज्ञां मुख्या, नृपमन्त्रिसेनापतिचर दूतसैनिकादीनां विषये निरूपणम्। विधिविषयिणी चर्चा तत्र गौण, प्रसत्रवशात्सप्तात्रत्वात्संक्षेपेणोक्ता। अत्र ग्रन्थे विशेषरूपेण स वर्ण्यत इति ग्रन्थकारस्याभिप्रायः।

''प्रतारकैरादृतमत्र किंचिन्मया तु निर्मूलतया तदुज्झितम्'' इति मात्रलिकपद्यांशोऽपि ग्रन्थस्यास्य वैशिष्ट्यंद्योतयति' सति हि केचन ग्रन्थकर्तायेऽन्ये, ये व्यवहारमधिकृत्य स्वस्वग्रन्थेषु व्यवस्थां प्रक्रियां वोक्तवन्तस्तत्सर्वमपि हेयनाधारहीनत्वात्प्रमाणाभावाच्च। अत्र नीलकण्ठस्याभिप्रायो विद्यते यद् व्यवहारमाश्रित्य ग्रन्थप्रणयनो तत्प्रयोजनमावश्यकमासीत्, यतो हि केषांचिल्लेखकानां ग्रन्थाः प्रामाण्यविरहितत्वादुपेक्ष्या एवासन्। अतः प्रमाणसम्मतग्रन्थस्य लेखनमावश्यकमित्यनुभूय नीलकण्ठस्यास्य प्रणयने प्रवृत्तिः।

यथा सर्वथा अभावेन आकाशपुष्पेण काचित्पूजा न संभवति तथैवाकाश–पुष्पवत् प्रमाणरहितेन तत्तल्लेखकानां ग्रन्थैः व्यवहारविनिर्णयोऽप्य संभव एव। अत्रेदमवधेयं विद्यत्ते यन्मनुस्मृत्यादिग्रन्थानां कृते न तस्योक्तिरपितु व्यवहारपक्षमाश्रित्य तदतिरैर्यल्लिखितं तत्कृते तथोक्तिः। प्रकृतग्रन्थे त एव स्मृतिग्रन्थाः प्रमाणभूताः।

उपर्युक्त–विवरणेनेदं सिध्यति यदयं प्राचीनभारतीयविधि–प्रक्रियायाः 'व्यवहारविशेषस्य' प्रामाणिको ग्रन्थोऽस्ति। अस्य लेखकोऽपि प्राचीनभारतीयविधिवेत्ता आसीदिति तद्ग्रन्थ एवात्र प्रमाणम्। अत एवाधुनिकभारतीयन्यायालयैरपि व्यवहारमयूखे निरूपिता विधिव्यवस्था निर्णयप्रसत्रे उपयुज्यते। सुविदितिमेव हि यदाधुनिकभारतस्य संविधाने 'हिन्दू ला' विशेषेण प्रतिपादितं हिन्दूनां, जनानां कृते उच्चन्यायालयेन (बम्बई) स्वतंत्रतापूर्वभारतस्योच्चतमन्यायालयभूतेन 'प्रिवीकौन्सिल' इत्याख्येन मनुस्मृतेः, मिताक्षरायाः, व्यवहारमयूखस्य प्रमाण्यं भारतस्य पश्चिमक्षेत्रास्य जनानां कृते स्वीकृतम[8]।

महाराष्ट्र– प्रदेशे, विशेषतो रत्नगिरिजनपदे 'मिताक्षरा' सर्वाधिका प्रमाणिकी मन्यते, सा मिताक्षरा व्यवहारमयूखे विशेषतः प्रमाणत्वेनोपन्यस्ता दरीदृश्यते। तत्क्षेत्रे व्यवहारवादाः मिताक्षरानुकूलाः निर्णीयन्ते[9]। व्यवहारमयूखो हि सर्वश्रेष्ठः प्रमाणिकश्च ग्रन्थः गुर्जर– प्रदेशे, बम्बई नगरे तथोत्तरकौकंणप्रान्ते च मन्यते[10]।

यद्यपि मिताक्षरा महाराष्ट्र–प्रदेशे विशिषतो मान्या विद्यते तथाप्यस्याः सिद्धान्ताः व्यापकरूपेण तादृशा एव सन्ति, यथाहि व्यवहारमयूखे वर्णिताः। तात्पर्यमिदं विद्यते यत् 'मिताक्षरा' मुख्यतः प्रचलनेऽस्ति, मिताक्षरागतसिद्धान्ताः व्यवहारमयूखगतानख्कूला एव न विपरीताः। एतावता व्यवहारमयूखस्य प्रामाणिकत्वं द्योतत एव[11]।

**सन्दर्भ–ग्रंथ सूचीः**


1. याज्ञवल्क्य स्कृति, 2.5। व्यवहारमयूखः, पृ0– 1।
2. अमरकोशः, 1/6/7, पृ0 84।
3. कात्यायनः, तदेव।
4. हेम, 4/287–88।
5. व्यवहारमयूखः, पृ0 1।
6. तदेव।
7. नीतिमयूखः (बनारस, 1880), पृ0 59।
8. द्रष्टव्यम्, मुरारजी बनाम पार्वतीबाई, आइ0एल0आर0। बम्बई, 177, पृ0 187, सावित्रीबाई बनाम लक्ष्मीबाई, आइ0एल0आर0 2, बम्बई 573, पृ0 606; लल्लूभाई बनाम कोसीबाई, आल0एल0आर0 5, बम्बई 110, पृ0 117 (पी0सी0), 130, पृ0 131।
9. द्रष्टव्यम्– कृष्ण जी बनाम पाण्डुरंग, 12, बम्बई उ0 न्या0, आर0, 65, 67–68; किं च 5 बम्बई उच्च0 आर0 (ए0सी0जे0) 181, 185, 7 बम्बई उच्च आर0 (ए0सी0पी0), पृ0 169 ; तथा जानकीबाई बनाम सुन्द्रा, आइ0एल0 आर0 14, बम्बई 612, 616 (रत्नगिरि)
10. लल्लबाई बनाम मुंकवरबाई, आइ0एल0आर0 2, बम्बई, 388 पृ0 418, आई0एल0आर0, 6 बम्बई, 541, 546, जानकीबाई बनाम सुन्द्रा, आइ0एल0आर0, 14, बम्बई 612, पृ0 623–24, व्यास चिमनलाल बनाम व्यास रामचन्द्र, आइ0एल0आर0 24, बम्बई 367 (एफ0बी0) पृ0 373।
11. भगीरथबाई बनाम कहुनजीराव, आइ0एल0राव0 11, बम्बई 285 (एफ0बी0) पृ0 293।